ISSN 2349-5928
Vol.2 No.2
July 2015-Dec. 2015

# HUMANITIES & SOCIAL SCIENCE REVIEW

***An International Peer Reviewed Refereed Journal***

Editor -in –Chief
**Dr. Vinay Kumar Pandey**

VYAS PRAKASHAN
VARANASI

# Cite this Issue

**As**

**Vol. 2 No. 2 *HSS Review* 2016**

Humanities and Social Science Review an International peer reviewed Refereed Journal is published bi-annually by Vyas Prakashan for Sunil Kumar Tripathi, Faculty of SVDV, Banaras Hindu University, Varanasi-05, India. Articles and other contributions for possible publication are welcome. Views expressed in the Articles, Shorter Articles, Book Reviews and all other contributions published in this Journal are those of the respective authors and do not necessarily reflect the views of the Editorial Board of the Humanities and Social Science Review and author shall be solely responsible for the same.

**COPYRIGHT** © 2015 Sunil Kumar Tripathi, Faculty of SVDV, Banaras Hindu University, Varanasi 05, India.

ISSN: 2349-5928

**Email Id. :** hssreview1@gmail.com

**PH. No. :** +91 9453036274, +91 8853825728

**Printed by:** Vikash Printer Varanasi, India

**Published By:** Vyas Prakashan, Man Mandir, Varanasi, India.

**Price: ₹ 500**

| | | | |
|---|---|---|---|
| 12. | संगीत शिक्षा का सामाजिक महत्व एवं उद्देश्य | श्वेता राय | 77 |
| 13. | नैषधीयचरितम् महाकाव्य में पाककला | स्वीटी कुमारी | 82 |
| 14. | उर्दू ग़ज़ल : परिभाषा और विकास | अंकित मिश्रा | 87 |
| 15. | स्मृति तथा धर्मशास्त्र में आश्रम व्यवस्था एवं संस्कार | अवनीश कुमार सिंह | 89 |
| 16. | राष्ट्रोन्नयन में शुक्ल यजुर्वेद का योगदान | नवनीत कुमार पाण्डेय | 97 |
| 17. | हिन्दी के आदिवासी जीवन केन्द्रित सामाजिक यथार्थ और उपन्यास | टीकम चन्द मीना | 102 |
| 18. | मध्य गांगेय क्षेत्र में सांस्कृतिक परिवर्तन की प्रक्रिया (प्रारम्भ से ऐतिहासिक युग तक) | विजेन्द्र राय | 111 |
| 19. | मध्य गंगाघाटी की उत्तरी काली ओपदार पात्र परम्परा | डॉ प्रज्ञा मिश्रा | 121 |
| 20. | तेन त्यक्तेन भुञ्जीथाः | डॉ. मेहन्द्र कुमार अंदवे | 126 |
| 21. | भूमि परीक्षण | सुनील कुमार त्रिपाठी | 131 |
| 22. | भागवत वर्णित माया–निवृत्ति के उपाय | डॉ0 चन्द्रशेखर सिंह | 139 |
| 23. | ज्योतिषे पृथिव्याः स्वरूपवर्णनम् | अश्विनी पाण्डेयः | 146 |
| 24. | याजुष्ज्योतिषम् | डॉ0 शत्रुघ्नत्रिपाठी | 153 |
| 25. | वेदेषु पर्यावरणचिन्तम् | जानकीशरणः दासः | 162 |
| 26. | पुराणेषु विश्वबन्धुत्वभावना | डॉ. अमृतलालः भोगायता | 169 |
| 27. | मित्रधर्ममुदीरयेत् | डॉ. पङ्कजकुमार एस्. रावलः | 174 |
| 28. | अभिज्ञानशाकुन्तले नृपस्य सङ्कल्पना | डॉ. डायालाल मालदेभाई मोकरिया | 179 |
| 29. | संस्कृतसंस्कारैरू समाजरक्षणे योगदानम् | बी. उमामहेश्वरी | 183 |
| 30. | पंचमहायज्ञानां सम्पादनविधानम् | उमा शंकर झा | 187 |
| 31. | नैतिकमूल्योत्थाने संस्कृतभाषायाः योगदानम् | डा0 श्यामधर तिवारी | 192 |

# संस्कृतसंस्कारैः समाजरक्षणे योगदानम्

बी. उमामहेश्वरी†

संस्कृतिः समस्तमानवानां संस्कारप्रदायिका भवति। मानवस्य सर्वविधवृत्तीनां परिष्कारपरिमार्जनादिकं संस्कारेणैव भवति। अतः संस्कारसम्पादनाय शरीरात्मनोः परिशुद्ध्यर्थञ्च शास्त्रैः संस्काराणां परिचयः विश्लेषितः। संस्कृत्या विभूषितः मानवः दया-करुणा-अहिंसा-मानवता-आदर्श-दान-सत्य-त्याग-उदारतारूपमहत्त्वपूर्णगुणैः संयुक्तो भवति। मानवस्वभावस्योपरि शासनकर्ता रूपेण शासति। मानवमनः (हृदयं) अत्यन्तमृदुस्वभावं कारयितुं संस्कृतौ क्षमता अत्यन्ता वर्तते। संस्कारेणैव मानवहृदयं विशालं भवति। संस्कृतं नीतिश्लोकमाध्यमेन करणीयाकरणीयकार्ययोर्भेदमुपस्थाप्य करणीयाणां कार्याणां निश्चयं कारयति। जीवनस्य विविध क्षेत्रेषु सुज्ञानं प्रापयति।

अस्माकं मुनयः चेतनाजगतः विलक्षणानुसन्धानकर्तार आसन्। तैः जन्मनः पूर्वादारभ्य मरणोत्तरपर्यन्तं जीवनस्य संस्कृतिसंस्काराणां विज्ञानसहितप्रक्रियाभिः सह एवं रचितं यथा जीवनयत्रायां निरन्तरपरिशोधः प्रगतिश्च भवेदिति। आत्मज्ञानं कस्याप्यनिष्टं मा भवेत्, आनन्दप्राप्तिश्च भवेदिति अस्माकम् ऋषीणां जीवनमस्माकं, अस्माकं संस्कृतेः सम्पूर्णभारतस्य च मेरुदण्ड इव प्रतिभाति।

मानवं पुरुषार्थान्प्रति नीयमानेदं ऋषिजीवनं संस्कृतेः प्राणः तथा मानवमात्रं प्रति प्रेरणाय अनन्तश्रोतश्च वर्तते। अस्माकम् ऋषिगणे ये सम्पूर्णज्ञानवन्तः, तान् अस्माकं वेदाः "अमृतपुत्रः" इति वदन्ति। तैः सृष्टेः स्थूलसूक्ष्मपदार्था यथा- पञ्चतत्त्वानि, सूर्यः, चन्द्रः, तारादि गणान् विचार्य, पाप-पुण्य, धर्म-कर्म, जीवात्म-परमात्मपर्यन्तं गत्वा भौतिकाध्यात्मिकशक्तयः सामाजिकजीवने उपयोक्तुं, जीवनं सुखीकर्तुं मार्गं सुस्पष्टं ज्ञापितम्।

वैदिकऋषिभिः प्रदर्शितमार्गः मानवजीवनाय अलङ्कारसदृशः। तैर्निर्दिष्टमार्गाः मानवं सुसंस्काराचरणद्वारा पवित्रं कारयन्ति। संस्काराः अस्माकं शरीरे मनसि बुद्धौ च स्थितमलान् निष्कास्य हृदयं स्वच्छतया सुभ्रतया च प्रकाशयन्ति। यथा चित्रकारः अनेकवर्णानुपयुज्य चित्रस्य शोभां द्विगुणी करोति तथा विधिद्वारा प्रोक्त संस्कारैः अस्माकमन्तः बहिश्च देवत्वं, तथा इहलोके सुयशः परलोके सद्गतिश्च प्राप्यते।

**"दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।**

**मा शुचस्सम्पदं दैवीमभिजातोऽसिपाण्डव॥**

**द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च"।**[1]

---

† असि.प्रो. न्यायदर्शनम्, श्री.सो.सं.युनिवर्सिटी, वेरावलम्।

[1]. श्रीमद्भगवद्गीता १६-५,६।

मानवस्वभावः द्विप्रकारकः- १.दैवी स्वभावः, २.आसुरीस्वभवः चेति। दैवसंस्काराः यस्मिन् भवन्ति ते सच्छीलेन, सदाचारद्वारा समाजस्य रक्षणं कुर्वन्ति। किन्तु कुसंस्कारयुक्ताः आसुरीस्वभावाः यस्मिन् ते समाजस्य नशं वाञ्छन्ति। अत एव शस्त्रेषु उपदिष्टम्— **"रामादिवत् वर्तितव्यं न रावणादिवत्"** इति।

संसारेऽस्मिन् अन्यप्राण्यपेक्षया मनुष्यः सर्वश्रेष्टः वर्तते। अन्यप्राणिनां जन्मानन्तरं यथावत् प्राकृतिकविकासो भवति। किन्तु मनुष्यस्य आगर्भादिव संस्काराणां बीजारोपणमारम्भो भवति। ततः जन्मानन्तरं **"एकादशेऽहनि पिता नाम कुर्यात्"**[1] इति विविधसंस्कारैः संस्कृतत्त्वे सति मनबुद्ध्यादि विकासो भवति। तेन सर्वप्राण्यपेक्षया मनुष्यः श्रेष्ठो भवति। समये समये निर्दिष्टसंस्काराणां करणद्वारा शरीर,मन,वस्तूणां शुद्धता स्वच्छता च भवति। मानवजीवनोपलब्धौ भागद्वयं वर्तते। सभ्यता- संस्कृतिश्च। सभ्यता यः कश्चन पुरुषस्य समाजं प्रति अन्यप्राणिभिः सह व्यवहारः कथमस्तीति दर्शनात् तस्य सभ्यता ज्ञाता भवति। सभ्यतायाः परिचयः, ज्ञानं मनुष्यव्यवहारेण ज्ञायते। तथा संस्कृतिः मनुष्यस्य आन्तरिकभावनानां (परिचय)दर्शनात् ज्ञायते। यदि सभ्यता मनुष्यस्य शरीरं भवति तर्हि संस्कृतिः तस्य आत्मा भवति।

मानवीयमानवतासाधनानि मनः, शरीरं, आत्मा, बुद्धिरिति। एतेषां साधनानां परिणतस्थितेः नाम संस्कृतिरिति। अस्माकं देशे भिन्नभिन्नराज्येषु विभिन्नाचारव्यवहारादिकं द्रष्टुं शक्यते। कुत इत्युक्ते तत्रस्थसंस्काराः भिन्नाः। संस्काराणां भिन्नत्वात् संस्कृतेरपि भिन्नता। यतो हि संस्कृतिः संस्कारैरेव निर्मीयमानत्वात्। सभ्यतया संस्कारो ज्ञायते, संस्कारेण संस्कृतिरिति सभ्यता संस्कारः संस्कृतिश्च नित्यमन्योन्याश्रयसम्बन्धेन तिष्ठन्ति।

यत्किमपि वस्तु जडो चेतनो वा स्वान्तरिकगुणैः प्रकटो न भवति। अपि तु अभ्यासेन प्रयत्नेन च यथार्थस्वरूपस्य तथा गुणानाञ्च प्रकाशो भवति। यथा भूमौ खननसमये लब्धधातुः पाषाणं वा आक्षणं अवगन्तुं न शक्यते। किन्तु तस्य शुध्यनन्तरं कर्तनतपनादि संस्कारैः संस्कारे सति ज्ञायते तत् वज्रं स्वर्णं वा इति। कार्यविहीनं पाशानं कश्चन कलाकारः स्वशिल्पकलया तं संस्करोति तदा सः पाशानः भगवतः दिव्यस्वरूपं प्राप्य पूज्यस्थानमलङ्करोति। तथैव (कुम्भकारः) मृदं चक्रस्योपरि संस्थाप्य स्वहस्तकलया बुद्ध्यनुसारं तं मृदं संस्कार्य भिन्नभिन्नाकाररूपेण उत्पादयति।

एकः सज्जनः स्वक्षेत्रे क्षेत्रं संस्करोति स्म। समयेऽस्मिन् तस्य एकस्य हरितपाषाणखण्डस्य दर्शनं जातम्। अत्यन्तं सुन्दरं तं पाषाणं नीत्वा सं एकस्मिन् आपणे दत्तवान्। तं दृष्ट्वा आपणिकः सुन्दरं वर्तते, एतदर्थमहं भवते विंशतिरूप्यकानि दातुं शक्नोमीति तस्मै विंशतिरूप्यकान्यददत्। ततः आपनिकः तं पाषाणखण्डं जलेन सुष्टु संस्कार्य मृण्मयं पाषाणम् उत्तमं वज्रसदृशमकारयत्। ततः विंशतिरूप्यकेषु क्रीतं तं हरितपाषाणखण्डं लक्षद्वये

---

[1]. स्मृतौ।

विक्रीतवान्। एतत्सर्वं किम्? विंशतिरूप्यकानां लब्दोऽयं पाषाणः लक्षद्वये कथं वा सः विक्रयमकरोत् इति चेत्, संस्कारमात्रेण। संस्कारमात्रेण पाषाणोऽपि वज्रो भवितुमर्हति।

तथा पृथिव्यामेवोत्पद्यमानवृक्षेभ्यः काष्टान् निष्कास्य तान् संस्कार्य गृहादिषु विविधालङ्काररूपेण निर्मीयन्ते। भगवान् जगन्नाथः, बलभद्रसुभद्रायाः विग्रहाणि, रथा अपि काष्टशिल्पेः हस्तयोः संस्कारीभूय, भगवतः महिमां प्राप्नुवन्ति। तथैव पशुपक्षीणामपि विशेषतया संस्कारयितुं शक्यते। संस्कार्यमाने सति तेषु नूतन संस्कृताः गुणाः प्रकटीभवन्ति। यथा यत्किमपि स्वभाषायामुच्यमानः शुकः विशेषसंस्कारदाने राम-राम, स्वागतमित्यादि पदानपि सुनायासेनोच्यते। तथा व्याघ्रभल्लूकादि क्रूरमृगा अपि ससंस्कारैः स्वमूलस्वभावमपि विस्मरन्ति।

एवं रीत्या कथनस्य तात्पर्यं वर्तते यत् सुसंस्कृतपुरुषसंयोगं प्राप्य जडो चेतनो वा वस्तुः सभ्यतां श्रेष्ठताञ्च प्राप्नोति। संस्कारयुक्तः पुरुषः स्वाचारव्यवहारैः समाजं शिक्षयति, स्वराज्यं शिक्षयति, तथा स्वदेशस्य संस्कृतेः रक्षामपि करोति। संस्कारयुक्तः पुरुषः स्वविकासेन समं नैतिकधार्मिकाध्यात्मिकास्थाभिः समर्पितो भूत्वा स्वपरिवेशस्य, तथा समाजं प्रति प्रेरकः मर्गदर्शकश्च भूत्वा सर्वत्र आदरं प्राप्नोति।

वस्तुतः पश्यामश्चेत् संस्कारस्य भेदाः द्रष्टुं शक्यन्ते। यथा – १. मलापनयनसंस्कारः, २. अतिशयाधानसंस्कारः, ३. हीनाङ्गपूर्तिसंस्कारः इति। अर्थात् वेजातीयद्रव्याणां संयोगेन मलिनभूतस्य सुवर्णस्य घर्षणतपनादिक्रियाभिः सह निर्मलीकरणं मलापनयनसंस्कारः। निर्मलभूतसुवर्णस्य किमपि आकारं दातुं किञ्चित्ताम्रधातुः तत्र निक्षिप्यते, सः हीनाङ्गपूर्तिसंस्कार इत्युच्यते। ततः अभूषणस्य निर्माणानन्तरं तस्मिन् वज्रवैढूर्यादीनां स्थापनम् अतिशयाधानसंस्कार इत्युच्यते।

लोके भौतिकविकासाय मानसिकोद्बोधनाय तथा पारिवारिकसम्बन्धेषु मानमर्यादरक्षनाय व्यावहारिक वैचारिकचारित्रकधार्मिकाध्यात्मिकविकासाय च मूलं संस्काराः। संस्काराः संस्कृत्या वर्धन्ते। संस्कृतेः ह्रासे सति संस्काराणां ह्रासः। संस्कार ह्रासे सति भौतिकमानसिकव्यावहारिकवैचारित्रकधार्मिकाध्यात्मिकेत्यादीनां सर्वेषां नाशः भवति। अतः एतेषां सर्वविधकार्याणां रक्षार्थं राष्ट्ररक्षार्थञ्च संस्कृतस्य रक्षा अनिवार्यतया करणीया। सांस्कृतिकावधारणानां ज्ञानायात्र संस्काराणां विधानं प्रोक्तमस्ति। यदि वयं तैः संस्कारैः संस्कृताः तर्हि संस्कारणुगुणं कार्यान् कुर्मः, तेन मनः वचः कर्म च संस्क्रियन्ते। तदा ते **"मनस्येकं वचस्येकं कर्मण्येकं महात्मनामि"**[1]ति हितोपदेश कथनानुसारं महात्मनः भवन्तीत्यत्र नास्ति संशयलेशोऽपि।

अस्माकं सर्वाणि शास्त्राणि अस्माकं जीवने संस्कारशिक्षणायैव सन्ति। गीताद्युपनिषदः यावत् अस्माकम् अज्ञानहरणद्वारा ज्ञानप्राप्त्यै संस्कारमेव विददति। ज्ञानप्राप्त्यै यत्किमपि कर्म क्रियते तत् निर्दूषितं निष्कलङ्कं च भवेत्। तदर्थं तत्र प्रथमं द्रव्यशुद्धिरपेक्षिता, क्रियाशुद्धिः

[1]. हितोपदेशः।

काङ्क्षिता, वाक्शुद्धिरपि। समेषामेतेषां सूद्ध्यर्थं प्रथमं संस्कारक्रिया बहिः आरम्भो भवति। ततः बाह्यशिद्धौ आन्तरिकशुद्धि अपि अपेक्षिता। यतो हि अन्तः करणे जन्मजन्मान्तरप्राप्ताः अनेकसंस्काराः विराजन्ते। तेषां संस्कारं विना अपवर्गप्राप्तिः अलभ्यत्वात्, तर्हि आन्तरिकविकाराः कथं भवन्तीत्यत्र भगवान् मनुना प्रोक्तम्—

**"बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते"**[1] । इति ।

अर्थात् विकाराः पूर्वजन्मनः, केचन लितृपितामहादिक्रमेण, अन्ये केचन बीजेषु, गर्भावस्थायां ततः अन्नपानादि सेवनात् अपि मनुष्यानां दोषाः उत्पद्यन्ते। तर्हि तानपि संस्कारैः संस्करणीयम् इति। संस्कारैः मनुष्यस्य ग्रहनक्षत्राणामपि योगः भवति। संस्कारैरेव मनुष्यस्य स्थूलशरीरतः सूक्ष्मभूतमनःपर्यन्तं तस्य जीवनविधिं संस्कर्तुं शक्यते। इयमेव संस्कृतिः।

संस्कृतं सर्वेषामपि मूलकारणमस्ति। संस्कृतैः गुणैः शारीरक, मानसिकाध्यात्मिकविधिषु सम्यक् विकासं प्राप्नोति। अधिकतया अद्यतनकाले संस्कृतस्यावश्यकता अत्यन्तं वर्तते। संस्कृतेन असंस्कृताः बुद्धिमन्तः पुरुषाः विचक्षणरहिताः भूत्वा कार्यानाचरन्ति। तान् दुःश्चर्यान्निरोद्धुं संस्कृतमेव साधनं वर्तते। अतः संस्कृतस्य रक्षणाय बद्धाः भूत्वा समाजशिक्षणं सर्वसंस्कृतज्ञानां कार्यं वर्तते। समाजशिक्षणार्थं यावच्छक्यम् अस्माभिः योगदानं दातव्यम्। इरि शम्।

**सन्दर्भग्रन्थसूची :**


१. श्रीमद्भगवद्गीता, गीताप्रेस् गोरखपुर्।

२. मनुस्मृतिः, चौखम्बा संस्कृत भवनम्, वाराणसी।

३. याज्ञवल्क्यस्मृतिः, चौखम्बा संस्कृत भवनम्, वाराणसी ।

४. सुभाषितरत्नभाण्डागारम्, चौखम्बा संस्कृत भवनम्, वाराणसी ।

५. चारुचर्या, चौखम्बा संस्कृत भवनम्, वाराणसी ।

६. हितोपदेशः, मोतीलाल बनारसी दास्, वाराणसी।


◈◈◈

[1]. मनुस्मृतिः – २.२७।